संस्कृतवार्ताः

दिनाङ्क :- 30.06.2025 प्रात: - 06:55

<u>अथ वार्ताः</u>

<u>पीएम-मन की बात</u>

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् स्वास्थ्यात् सामाजिकसुरक्षापर्यन्तं देशः प्रत्येकस्मिन् क्षेत्रे परिपूर्णतायाः भावनया अग्रेसरति। सः अवदत् यत् वर्तमानकाले भारतस्य अधिकांश जनसंख्याः किञ्चित् सामाजिकसुरक्षायाः लाभं गृह्णाति ।

अद्य आकाशवाण्याः मन की बात इति कार्यक्रमे स्वविचारं प्रकटयन् श्रीमोदी आईएलओ अर्थात् अन्तर्राष्ट्रीयश्रमसङ्गठनम् इत्यस्य प्रतिवेदनस्य उल्लेखं कृतवान् । यस्मिन् प्रतिपादितम् यत् भारतस्य चतु:षष्टिः प्रतिशतमिताः जनसंख्याः निश्चितरूपेण केषाञ्चन सामाजिकसुरक्षायाः लाभं गृह्णाति ।

**बाइट-पीएम सोशल प्रोटेक्शन-40 से.**

प्रधानमन्त्री आपत्कालविषये अवदत् यत् सहभागितायाः शक्तिः बृहत्तमं संकटं अपाकर्तुं शक्नोति । श्री मोदी उक्तवान् यत् कतिपयदिनानि पूर्वं देशे आपात्कालस्य पञ्चशत् वर्षाणि पूर्णानि जातानि सन्ति तथा च देशवासिनः संविधानहननदिवसः आमानितः। सः अवदत् यत् देशः तान् सर्वान् जनान् स्मर्तुं अर्हति, यैः आपत्कालं सम्मुखीकृतवन्तः। यतोहि अनेन ते संविधानं सुदृढं, स्थायीरुपेण च स्थापयितुं प्रेरणां यच्छन्ति। श्री मोदी प्रोक्तवान् यत् तस्मिन् समये बहवः जनेभ्यः यातनाः प्रदत्ताः । छात्राः अपि उत्पीडिताः अभवन् ।

<u>राष्ट्रपति उत्तर प्रदेश</u>

राष्ट्रपति पदासीना द्रौपदी मुर्मु: अद्य प्रभृति उत्तरप्रदेशस्य द्वि-दिवसीय यात्रां विदद्यात्। श्रीमती मुर्मु: तत्र बरेली-जनपदे भारतीय-पशु-चिकित्सा-अनुसन्धान-संस्थानस्य एकादशे दीक्षान्त-समारोहे भागं ग्रहीष्यति। तदनन्तरं राष्ट्रपति: गोरखपुर-एम्स इत्येतस्य प्रथमे दीक्षान्त-समारोहे सम्मिलिता स्यात्। श्व: श्रीमती मुर्मु: महायोगी-गुरू-गोरखनाथ-आयुष-विश्वविद्यालयस्य उद्घाटनं विधास्यति।

<u>डॉ.जयशंकर:-अमेरिका यात्रा</u>

विदेशमन्त्री डॉ. सुब्रह्मण्यम-जयशंकर: अमेरिका देशस्य पञ्चदश्यां यात्रायां गमिष्यति1 अमेरिकादेशीय-विदेश मन्त्रिण: मार्को रूबियो इत्येतस्य निमन्त्रणे अद्य प्रभृति त्रिदिवसीयायां आधिकारिक्यां यात्रायां डॉ.जयशंकर: अद्य अमेरिकादेशं सम्प्राप्येत्। एतद्-यात्रान्तर्गतं डॉ.जयशंकर श्व:समायो क्ष्यमाणे क्वाड-विदेशमन्त्रिणाम् उपवेशने भागं ग्रहीष्यति। विदेशमन्त्रालयस्य वक्तव्यानुसारेण क्वाड समूह: हिन्दप्रशान्ताय सामूहिक दृष्टिकोणस्य सम्वर्द्धनाय नव प्रस्तावेषु ध्यान केन्द्रीकरणं करिष्यति। अवधेयं यत् एतत् उपवेशनं पहलगाम-आक्रमणानन्तरं क्वाड-मन्त्रिणां प्रथमम् उपवेशनं स्यात्। डॉ.जयशंकर: अद्य न्यूयॉर्क-नगरे संयुक्त-राष्ट्र-मुख्यालये **आंतकवाद की कीमत** इत्याख्या: प्रदर्शन्या: उद्घाटनमपि करिष्यति,यत्र आंतक-कृत्यानां विनाशपरेषु प्रभावेषु चर्चा भविष्यति।

## रेलयानमन्त्री-अश्विनी वैष्णव:

रेलयानमन्त्री अश्विनी वैष्णव: रेलयानानां निश्चितसमयात् अष्टहोरापूर्वमेव आरक्षण-तालिका-निर्माणाय निर्देशान् दत्तवान्। श्री वैष्णव: एतदर्थं प्रक्रिया-प्रारम्भाय निर्दिष्टवान्। एतेन यात्रिणां कृते वैकल्पिकी- व्यवस्था- सुनिश्चितीकरणाय प्रशासनाय अधिक: समय: मिलिष्यति। यात्रिणां सौविध्येषु चापि वर्द्धनं भविष्यति।

## यूएस ओपन-प्रतिस्पर्धा

**यूएस ओपन-विंशति: पञ्चविंशंति**: इत्येतस्य विजेता विंशतिवर्षीय: आयुष: शेट्टी इतिहासं रचितवान्। आयुष: शेट्टी **बी डब्लू एफ** प्रतिस्पर्धाविजेतृ-रूपेण द्वितीय: भारतीय: स्यात्। आयुष: निर्णायके द्वन्द्वे कनाडा-देशीयं **ब्रायन यांग** इत्यमुं एकविंशति:-अष्टादश एकविंशति:-त्रयोदश इत्यन्तरालै: पराभूय इतिहासयात्रां पूरितवान्।

।। इति वार्ता:।।